नं० ५६६२-घ

कूष्माण्डीपूजाविधिः

पत्रे २ (द्वावेव) (सम्पूर्णम्)

~~नं० १२०२~~

5662 / F 2

complete

कूष्मांडीपूजाविधिः

श्री॰ ततोन्येद्युः प्रातःकृत्यंविधाय यागस्थलीमेत्यासनशुद्ध्या
दिकंसंपाद्य संकल्पंकुर्यात् अस्यश्रीकूष्मांडीमंत्रस्य ब्र
ह्माऋषिः अनुष्टुप्छंदः श्रीकूष्मांडीदेवता ह्लींबीजं ह्रींश
क्तिः प्रणवःकीलकं नमोदिग्बंधनं चतुर्वर्गफलप्राप्त्यर्थेवि
नियोगः ऋामितिन्यासः पूर्ववदाचम्य प्राणायामत्रयंविधा
य घटंमातृकाक्षरैरभ्यर्च्य ॐह्रींसः देविकूष्मांडिएह्येहिसन्नि
धिंकुरुर पूजांगृह्णर श्रींॐस्वाहेत्यावाह्य मूलेनपाद्यादिनिवेद्य
घटंबहिःसंपूज्य मध्येपूजयेत् मूलं कामेश्वर्यैनमः मूलंकां
तायैनमः कृशोदर्यैनमः कलावत्यैनमः काल्यैनमः चंडिन्यै
नमः तंत्रिकायैनमः मूलं परस्परायैनमः ॐश्रींह्रींक्लींकू–

ष्मांड्यै नमः इति सम्पन्नधागंधादि नैवेद्यं निवेद्य ध्यानं उद्य
द्दात्रीशाननां चंद्रचूडां पंचास्यस्थां त्रीक्षणां सुप्रसन्नां शाखाब्जे
ष्विष्टासनैः शोभिहस्तां श्रीकूष्मांडी हृत्सरोजे भजेह घटाग्रे पूर्व
वत्कुमारीपूजनं जपपाठादिकं निर्वर्त्य खीरपायसखंडाद्यैर्व
स्त्राभरणोज्ज्वलैः दक्षिणाभिः स्तवैर्देवितोषयेत् काम्यकाः
सुधीः अयुतं तु जपं देवि तदर्धं वा महेश्वरि अतो दशांशतो हो
मः कार्यः साधकसत्तमैः एवं विसर्जयेत् इति कूष्मांडीपूजा
विधिः समाप्तः ॥ ४ ॥

श्री

2



नं० ५६६२-घ
कूष्माण्डी पूजाविधि: (तन्त्रम्)
पत्रे २ (द्वावेव) (सम्पूर्णम्)